महामहोपाध्याय-

पण्डित-श्रीदुर्गाप्रसादः ।



जन्म ।

ई० स० १८४६

मृत्युः ।

ई० स० १८९२

PRASÂDAS'ATAKA

OR

THE LIFE OF MAHÂMAHOPÂDHYÂYA PANDIT DURGÂPRASÂD

LATE EDITOR OF "KÂVYAMÂLÂ."

BY

PANDIT DURGÂPRASÂD DVIVEDÎ.

EDITED

BY

KÂS'ÎNÂTH PÂNDURANG PARAB

(EDITOR OF "KÂVYAMÂLÂ")

AND

PRINTED AND PUBLISHED

BY

THE PROPRIETOR

OF

JAVAJI DADAJI'S "NIRNAYA-SAGARA" PRESS.

BOMBAY.

1892.

प्रसादशतकम्

पत्रि. सं. 121
क्रमांक .....

नाम

महामहोपाध्याय-पण्डित-श्रीदुर्गाप्रसादानां

जीवनचरितम् ।

जयपुरमहाराजाश्रितेन पण्डितसरयूप्रसादतनयेन

द्विवेदोपाख्येन पण्डितदुर्गाप्रसादेन

विरचितम् ।

साधुर्जनः पश्यतु काव्यमेतदित्यर्थयामो जगदीश तुभ्यम् ।
कदापि मास्मिन्पततु प्रचण्डा शनैश्चरस्येव खलस्य दृष्टिः ॥

एतत्

परवोपाह्वेन पाण्डुरङ्गतनूभुवा काशीनाथशर्मणा

संशोध्य

मुम्बापुर्यां निर्णयसागराख्ययन्त्रालये तदधिपतिद्वारा

मुद्रायितम् ।

उपोद्घातः ।

श्रीगणेशाय नमः ।

सततनिगमाभ्यासोल्लासप्रकामसनीकृते
वपति महतां चेतःक्षेत्रे विवेकजलोक्षिते ।
य उपचरितः संविद्बीजं यथेष्टफलोदयं
स भुवनवनीमालाकारः शिवाय शिवोऽस्तु वः ॥

(अयं मम दशकण्ठवधस्य।)

प्रथमो गुरुः—

निःसीमसौजन्यसुधासमुद्रा दुर्गाप्रसादाः सुधियो जयन्ति ।
येषां प्रयासेन जडत्वपात्रमहो अहं चाप्यभवं मनुष्यः ॥

द्वितीयः—

पद्माग्निर्नृपवन्दितो द्विजपतिः पुंरूपवाग्देवता
विद्वत्कैरवचन्द्रमा विजयते श्रीचापुदेवः कृती ।
ज्योतिःशास्त्रमनन्तयुक्तिविततं स्कन्धत्रयाधिष्ठितं
चैतन्यं जगतेव वासरमणेर्यस्मादवाप्तं मया ॥

तृतीयः—

येष्वध्यापनतत्परेषु धिषणप्रागल्भ्यलक्ष्मीकृप-
श्चित्रं चित्रमहो भवन्ति गुरवोऽनन्ता अनन्तातले ।
ते दाक्षीसुतशासनाब्धिलहरीसाम्राज्यमप्यान्तराः
श्रीमद्रामभजाश्चकासतितमां षट्शास्त्रबीजाङ्कुराः ॥

अहह विचित्रं खलु पारमेश्वरं गतिविलसितम्, यत्र निपुणं निरूपितेऽपि फलमेवानुभूयते, न तावद्व्यापारकणिकापि ।

हा हन्त विलक्षणः किल शोकशिखी, योऽन्तः प्रविश्य प्रतिक्षणं समेधमानोऽविलम्बितमेव निर्वृतिदानदीक्षितां तत्रत्यां शिशिरतामाहृत्य लोचनयुगस्खलदुष्णसलिलासारसंनिपातकैतवेन ता यदा विकासयति यासु क्षणमपि स्थितुं राजहंसैर्नोत्सहते ।

अहो हृदयान्तरान्नापसरन्ति ते दुर्वृत्तविपाकविलासा येन मानसं शतधा स्फुटदिव, शरीरं खंसमानमिव, दुस्तरे तिमिरपयोनिधावन्तरात्मा मज्जान इव क्वापि विश्रमं न लभते ।

ही एके ते वासराः, येषु च लज्यतामालस्यम्, मुच्यतां शयनीयम्, क्रियतां प्राभातिकम्, परिशील्यतां शास्त्रम्, विधीयतां भोजनम्, पीयतां पानीयम्, अतिक्रामति वेला गम्यतां बहिः, संक्रियतां कर्म, परिधीयतां वसनम्, गृह्यतां यष्टिः, अवलोक्यतामेतत्, श्रान्तोऽसि चेद्विश्राम्यतामिह, प्रलासीदति समयः साध्यतां पद्धतिरेवंप्राया: प्रणयपेशलाः सूक्तयो व्यजृम्भन्त ।

हा धिक्, एके त्वमी वासराः, येषु न सादरमुक्तिचन्द्रिकालोकैकलोलेन चेतसमानमानसचकोरकस्योपादानालम्बनाभावनिःसारं जगदेतन्निरीक्ष्यते ।

आः कष्टोऽयं संसारः । संप्रति तदिवृत्तं स्मारंस्मारं **केदारा**दिकं दर्शं दर्शं च लिखतापि वल्गाना मामकी तनुरिव न प्रभवति लेखनी । अश्रुविन्दुभिः सह प्रान्तः स्फारीभवन्ति कलमाग्रमपीपाताः । पदन्यासः समूलमुन्मूलयतीव हृदयम् । तार्सातं तदुक्तिः सपत्राकरोतीव प्रतीकान् । भवन्ति चात्र श्लोकाः—

धारावन्धमनी पतन्ति सततं दृग्भ्यां पयोविन्दवः
कीलालीढमिवान्तरं स्फुटति हा गात्रं मुहुः सीदति ।
जायन्ते पुरतस्तमांसि धिषणा वैकल्यमालम्बते
हिलास्मान्क गतोऽसि शीघ्रमहहा प्रत्युत्तरं दीयताम् ॥
आत्मीविभ्रमरङ्गभूपरिसरे रत्नप्रदीपायिते
निर्वाणत्वमुपागते कृतिरवौ **दुर्गाप्रसाद** त्वयि ।
खद्योतैः स्फुरितं तमोभिरुदितं घूकैः समुज्जृम्भितं
सचकैः परितो निमीलितमहो हा हन्त किं नाभवत् ॥
हा हा नूतनकल्पनाकुमुदिनीराकातुषारद्युते
तत्तद्ग्रन्थसहस्रशाणपटलीशाणायितज्ञप्तिभूः ।
किं फुर्मः क्व च याम आः कमिह हा तांस्तांश्च गूढाशया-
न्पृच्छामोऽहह हाधुनास्ति भुवने कस्त्वादृशो मार्मिकः ॥

विलक्षणा हि तत्सौहार्दपरिपाटी, या कल्पशतेनापि सूचयितुं न शक्यते किं पुनर्वर्णयितुम् ।

जयपुरागमनानन्तरं तस्य महात्मनः सर्वेषामस्माकं चैकस्मिन्नेव निकेतने चिरमवस्थानमासीत् । कालान्तरे संजातविप्रकर्षेऽपि तादृशमहो नाभवद्यत्र तस्य सर्वेषामस्माकं च समागमो नाजनि । किंवहुना—गुरावि[1] मम तातपादे तन्मान्यताग्रहोऽभूत् । शैशवे प्रथमं तत एव मया साहित्यादि परिशीलितम् । एवं तस्य सर्वेषामस्माकं च प्रत्यहमुपचीयमानप्रेमवन्धमांसलो व्यतिकर आसीत् ।

हा धिक् तत्सकलमद्य गन्धर्वनगरमिव गगनकुसुममिव स्वप्नावलोकितमिव मिथ्याभूतमजनिष्ट ।

तस्य हिमकरकरनिकरकरम्बितकुमुदकाननोद्दामसौभाग्यद्वैराज्यसञ्जादरयशोराशिनासीरकरण्डीकृतब्रह्माण्डविवरस्य विद्याशास्त्रकलाकलापकलनाश्रमश्रान्तस्येव दीर्घनिद्रासुखो लब्धमहामहोपाध्यायपदवीकस्यासीमगुणपयोधिकणिकासूचकमदः **प्रसादशतकं** विरचय्य, **सुम्बापुर**वास्तव्याय निजसुहृत्तमाय **परवो**पाख्याय **पाण्डुरङ्ग**तनूभुवे श्रीमत्काशीनाथशर्मणे समर्पितम्। तेनाथ **जावजी**श्रेष्ठिनस्तनयेन **तुकाराम**श्रेष्ठिना च **निर्णयसागर**नाम्नि यन्त्रालये तन्मुद्रायितमिति शिवम् ॥

---

१. क्रियाविशेषणम्. २. 'दीर्घान्तमपीदम्' इति मुकुटः. ३. नासीरं कर्पूरम्.

॥ श्रीः ॥

प्रसादशतकम् ।

अस्ति प्रशस्ते त्रैतिलोकशस्ते दुण्ढारदेशेऽलवरप्रदेशे ।
अखण्डतत्तज्जनसौख्यसख्यो ग्रामो गरीयान्ह्मजापुराख्यः ॥ १ ॥
अमन्दसौगन्ध्यतरङ्गिताभिर्मरन्दसंदोहकरम्बिताभिः ।
पतत्प्रसूनावलिबन्धुराभिर्यो भूष्यते कुञ्जपरम्पराभिः ॥ २ ॥
कुजातिरम्योऽपि सुजातिशाली गोत्रानिवेशोऽप्यमृताशयाढ्यः ।
यः पाटलाभोऽप्युपशल्यरूढद्रुमप्रभाश्यामलितश्चकास्ति ॥ ३ ॥
जागर्ति यत्र प्रणतार्तिहारी स शंकरो नार्मदलिङ्गधारी ।
यः शेखरीभूतशशिच्छलेन दुर्गाप्रसादस्य यशो बिभर्ति ॥ ४ ॥
चौरासियागौडकुलप्रसूतिर्दिगन्तरव्याप्तयशोविभूतिः ।
अनन्यसाधारणधर्मकर्मा बभूव तत्र व्रजलालशर्मा ॥ ५ ॥
य एकतानो नियतात्मवृत्तिर्विधानकृष्टिः परमैकदृष्टिः ।
चचार जालंधरपीठमध्ये तपांसि लोकोत्तरशक्तिभांसि ॥ ६ ॥
यो दैववेदी लवपत्तनान्तः काराजुपं तं च गुलाबसिंहम् ।
सत्यं वदाम्यङ्ग जहातु खेदं भवान्नृपालो भवितेत्यवादीत् ॥ ७ ॥

---

१. 'विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्यः' इत्यनेन 'देवदत्तः । दत्तः । सत्यभामा । भामा । इत्यादिप्रयोगवदिह दुर्गापदलोपो द्रष्टव्यः । तथा च 'दुर्गाप्रसादशतकम्' इति फलितोऽर्थः । स्पष्टोऽयमर्थो व्याकरणमहाभाष्यस्य पस्पशाह्निके 'सिद्धे शब्दार्थसंबन्धे' इति वार्तिकव्याख्याने । तेन 'प्रसादस्तु प्रसन्नता' इति कोषलभ्योऽर्थो निरस्तः । २. अव्ययीभावगर्भितस्तत्पुरुषः । ३. अखण्डमविच्छिन्नं तत्तज्जनानां सौख्यं सख्यं च यस्मात् । सुखमेव सौख्यम्, स्वार्थे ष्यञ् । ४ कुजातिः सुजातिर्न भवतीति विरोधः । कौः पृथिव्या जाताः कुजा वृक्षाः, 'पञ्चम्यामजातौ' इति डः । तैरलन्तं मनोहरः । सुजातयो ब्राह्मणादयः, तैः शालत इति तत्परिहारः । ५. यो हि भूमौ निष्टति स नादरभृताश्रयो न भवतीति विरोधः । गोत्राणामा समन्तान्निवेशो यस्मिन् । गोत्रा भूः, गोत्रोऽद्रिः । यद्वा गवां समूहो गोत्रा । 'इनित्रकट्यचर्च' इति त्रः । अमृतं जलम् इति तत्परितः । ६. श्वेतरक्तः श्यामो न भवति । पक्षे पाटलैर्गोत्रिभिराभातीति पाटलाभः । कः । ७. कृष्टिः पण्डितः ।

ततश्च जम्बूनगरे नृसिंहे नृपत्वमायाति गुलाबसिंहे ।
सासादिता येन विदा प्रतिष्ठा याख्याप्यतेऽद्यापि तदीयकीर्त्या ॥ ८ ॥
या शोभते श्रीनगरीन्दिरेव विश्वंभरालंकरणैकहेतुः ।
तस्यां वितस्तातटशालि येन सौधं यशःकूटमिव व्यधायि ॥ ९ ॥
समस्तसिद्धान्तरहस्यवेदी प्रश्नक्रियाद्वारकवाटभेदी ।
स संपदो ब्राह्मणसाच्चकार किं चार्तपालीविपदो जहार ॥ १० ॥

तस्मादभूदतिविसृत्वरकीर्तिवल्ली-
पुष्पप्रतानसुरभीकृतरोदसीकः ।
उच्चावचागमविचारविशेषशोभी
दुर्गाप्रसाद इति पण्डितमौलिरत्नम् ॥ ११ ॥
उद्द्योतते दिवस एव मरीचिमाली
नक्तं चकास्त्यहह कैरविणीविलासी ।
रात्रिंदिवं ज्वलति यस्य विजृम्भमाण-
पीयूषसिन्धुलहरीललिता गुणश्रीः ॥ १२ ॥
के सन्ति भूमिवलये हृदयालवोऽत्र
ये तद्गुणामलरसायनसेवनेन ।
उद्भूतपाटवपरिष्कृतशेमुषीकां
व्युत्पत्तिवारवनितां न परिष्वजन्ते ॥ १३ ॥
मालामिवोज्ज्वलगुणावलिराजमाना-
मामोदवीचिवलितां सुमनोभिरामाम् ।
यस्याद्भुतां सरससूक्तिमुदीर्णरागं
के के न बिभ्रतितरां शिरसा रसज्ञाः ॥ १४ ॥
आदित्यभूपरिगता सुरनिम्नगेयं
यस्य प्रभावकलयानुगृहं विभाति ।

---

१. विश्वंभरो विष्णुः, विश्वंभरा भूः । २. सौधोऽस्त्री । ३. कूटं राशिः । ४. कृयोगे 'देये त्रा च' इति चकारानुकृष्टः त्रातिः । ५. 'नवृतश्च' इति कप् । ६. रात्रौ च दिवा च रात्रिंदिवम्, 'अचतुर-' इति साधुः । ७. 'हृदयाच्चालुरन्यतरस्याम्' इत्यालुः । ८. नद्यन्तत्वात्कप् । ९ माधुर्यादयो गुणाः सूत्राणि च । १०. आमोद आनन्दः सौरभ्यं च । ११. सुमनसो विद्वांसः कुसुमानि च । १२. काव्यमालादिपुस्तकानां शुक्लकृष्णवर्णं लक्ष्यीकृत्य रूपकातिशयोक्तिरियम् ।

यत्रारचय्य कतिचित्कृतिनोऽवगाहं
मालिन्यपातनकृते प्रगुणीभवन्ति ॥ १५ ॥
चित्रं स कश्चिदिह चित्रशिखण्डिडिम्भो[1]
विद्योतमानगुणडम्बरडिण्डिमश्रि ।
यत्सूक्तिविभ्रमसुधारसपानकेलि-[2]
सौहित्यतुन्दिलतयेव गुरुत्वमाप ॥ १६ ॥
यत्कीर्तिरुष्णविषयेषु[3] चिरं विहृत्य
तद्वासजातपरितापजिहीर्षयेव ।
आविर्भवद्बहलशीतनिरन्तरेषु
यूरोपभूपरिसरेषु[4] वरीवृतीति ॥ १७ ॥
सर्वोपसर्गरहितौ[5] सममुन्मिषन्तौ
मुक्ताप्रवाललतिकास्तवकायमानौ ।
यस्याद्भुतौ शशिरवी इव मध्यवृत्ती
केषां मुदे विलसतो न यशःप्रतापौ ॥ १८ ॥
दिक्कामिनीवदनपङ्कजकोरकेषु
कर्पूरकुङ्कुमविलेपमिवार्पयन्तौ ।
शीतोष्णखेदहृतये जगतः किमेता-
वेकीबभूवतुरमुष्य यशःप्रतापौ ॥ १९ ॥
एकेन[6] शीतमपरेण च ताप एव
हा हन्त नौ[7] जनिरियं जनपीडनाय ।
इत्याकलय्य गिरिशाविव[8] यस्य नूनं
कीर्तिप्रतापरसिकौ मिलितावभूताम् ॥ २० ॥

---

१. चित्रशिखण्डिनोऽङ्गिरसो डिम्भो बालकः । २. यदीयसूक्तसुधापानात्मकं गुरुत्वसंबन्धेऽपि तदसंबन्धोक्तिरतिशयोक्तिः, सा चोत्प्रेक्षया संकीर्यते । तथा च नायकस्य गुर्वतिशायिनी विद्यासमृद्धिर्वस्तु व्यज्यते । ३. मध्यदेशेषु । ४. उत्तरगो राजपुरोधादयः । ५. सामान्ये नपुंसकम् । ६. आवयोः । ७. गिरिशा च गिरिशश्च गिरिशौ । 'पुमान्स्त्रिया' इत्येकशेषः ।

त्रैलोक्याभरणायमानसुगुणग्रामस्य यस्याधुना
पर्याप्तौ जगतः शिवाय सुतरां कीर्तिप्रतापावतः ।
हा वीप्सा जनितैतयोरिति यदा मीमांस्यते ब्रह्मणा
चन्द्रोऽर्कोऽपि तमच्छलोल्वणमपीकूर्चैस्तदा लिप्यते ॥ २१ ॥
चन्द्रोऽधारि विसारिरश्मिविसरो गङ्गा तरङ्गाकुला
शेषः कञ्चुकभूषितः सिततमं भस्मापि भाभूतये ।
नैवावापि तथापि यस्य यशसां सादृश्यलक्ष्मीरिति
क्ष्वेडः कोपकषायितेन गिरिजाजीवातुनाभक्षि किम् ॥ २२ ॥
कैलासन्तकि तारकन्तकि दलन्मल्लीकलापन्तकि
व्याधामायुधकुञ्जरन्तकि जटाटीराट्टहासन्तकि ।
उद्यत्कुन्दकदम्बकन्तकि वलत्पीयूषपूरन्तकि
श्वेताब्जन्तकि यस्य कीर्तिकणिका ब्रह्माण्डभाण्डोदरे ॥ २३ ॥
राकानायककामनीयककलाव्याघूर्णमानामल-
क्षीराम्भोधितरङ्गताण्डवरमासौभाग्यसर्वंकषे ।
यत्कीर्तिप्रसरे विधूततिमिरे व्याप्तत्रिलोकान्तरे
हंहो काकपिकादयोऽपि सहसा हंसावतंसन्तकि ॥ २४ ॥
भ्राम्यत्सान्द्रसुधासमुद्रलहरीश्रीगर्वनिर्वासिका-
मन्तर्वाणिमणेरमुष्य यशसां लक्ष्मीं कथं ब्रूमहे ।
यन्मात्सर्यवशादसावनुशयज्वालावलीवेल्लितः
प्रालेयद्युतिरात्मनो मलिनतामद्यापि नैवोज्झति ॥ २५ ॥
स्मारंस्मारमसीमगौरवजुषो यस्यावदानोत्करा-
न्वारंवारममी भवन्ति सुधियो वाचंयमत्वे दृढाः ।
मन्दस्यापि ममात्र तान्निगदतो नोज्जृम्भते यत्रपा
तन्नूनं समुदेति सांप्रतमहो धार्ष्टस्य विस्फूर्जितम् ॥ २६ ॥

---

१. 'तदोजसः–' इत्यस्य भङ्ग्यन्तरमेतत् । २. 'सर्वप्रातिपदिकेभ्यः–' इत्यादिना क्विपि 'कैलासन्ति' इति जाते ततः 'अव्ययसर्वनाम्नामकच्प्राक्टेः' इत्यत्र मण्डूकप्लुत्या 'तिङ्ति' इत्यनुवर्तनादकचि 'कैलासन्तकि' इत्यादि सिध्यति । ३. व्याधाम वज्रम् । ४. जटाटीरः शिवः । ५. कीर्तिपरमाणवः ।

दुर्वर्णोद्गमभास्वरापि परितो दीव्यत्सुवर्णाश्रया
जम्बूद्वीपसुकर्णिकेव रुचिरा जागर्ति जम्बूपुरी ।
तत्राष्टाङ्गतुरङ्गभू(१७६८)मितशकस्योर्जे सिताद्यातिथौ
चन्द्रे यस्य महात्मनोऽजनि जनिर्भूतानुकम्पोदया ॥ २७ ॥
तातस्याथ गुलाबसिंहजनुषो जम्बूमहीमण्डल-
स्वाराजो रणवीरसिंहकृतिनः शिक्षाविशेषेण यः ।
अह्नायैव हिताहितव्यवहृतौ तत्तत्प्रमेयांशके
सारासारविचारमार्मिकतया चाणक्यचर्योऽभवत् ॥ २८ ॥
कर्पूरादपि पारदादपि सुधाडिण्डीरपिण्डादपि
प्रालेयादपि मौक्तिकादपि शरत्पूर्णेन्दुबिम्बादपि ।
फुल्लत्कैरवकाननादपि वलद्गङ्गातरङ्गादपि
क्षुभ्यत्क्षीरमहार्णवादपि सिते तेजस्यभूद्यन्मतिः ॥ २९ ॥
प्रत्यग्रस्तनयित्नुमञ्जिमहरं तापिच्छगुच्छच्छवि
व्याकोशासितसारसालिसुषमाद्वैराज्यसज्जस्तृहम् ।
यत्कृष्णात्मकमप्यपारतिमिरप्राग्भारमुन्मूलय-
न्नित्यं भक्तहृदम्बुजेऽर्कतितरां तत्रांसि यस्यास्यया ॥ ३० ॥
आरामादिव विविधागमाभिरामारुद्धोपद्विजपटलीविराजमानात् ।
सामोदात्कृतिपुरुहूतसोमनाथाद्येनोद्यत्प्रमदमलम्भि सौमनस्यम् ॥३१॥
आहूतान्नरपतिना पिनाकपुर्या विस्फूर्जद्बहुधनमानदानवृष्टि ।
दुर्ज्योतिश्श्रणकुलकालियाहिकृष्णाद्योऽध्यैष्ट ग्रहगणितानि देवकृष्णात् ३२

१–२. दुर्वर्णा सुवर्णा न भवतीति विरोधः । दुर्वर्णानां रजतानामुद्गमेन देदीप्यमाना, दीव्यतां सुवर्णानां कनकानामाधारभूतेति विरोधपरिहारः । ३. स्वाराट् शब्दः । ४. डिण्डीरपिण्डः फेनपुञ्जः । ५. 'आति' इति आतधातोर्भावे रूपम् । ६. आगमः, अगमः इति च्छेदः । ७. द्विजा ब्राह्मणाः, पक्षिणश्च । ८. पण्डितेन्द्रः, स चासौ सोमनाथश्चेति कर्मधारयः । ९. सौमनस्यं पाण्डित्यं संतुष्टमानसत्वं च । १०. ज्योतिःशब्दस्तत्प्रतिपाद्ये शास्त्रे भाक्तः, अत एव 'ज्योतिषमधीते वेद वा' इति व्युत्पत्त्या ज्यौतिषिकशब्दस्य निष्पत्तिः, तथा च ज्योतिषा वित्ता ज्योतिश्श्रणाः । चणप् । दुष्टा ये ज्यौतिषिकाः कालेषां कुलमेव कालियाहिस्तत्र कृष्ण इति तात्पर्यम् ।

यो विद्वानपि **रणवीरसिंह**भूभृद्विज्ञप्तस्तदचरमेण[1] नन्दनेन ।
प्राज्ञेभ्यः सविनयमिङ्गितादिविद्यां संसारव्यवहृतिसिद्धयेऽध्यगीष्ट ॥ ३३ ॥
क्रीडायां सकलकलाग्रहप्रसङ्गे मीमांसावलयिनि मन्त्रविस्तरेऽपि ।
अन्योन्यप्रणयसुधावगाहसान्द्रं सौहार्दं नृपतनयस्य तस्य चासीत् ॥ ३४ ॥
सौशील्यप्रभृतिगुणावलीमहिम्ना या व्रीडाविषयमरुन्धतीमनैषुः ।
ता मातृरिव **रणवीरसिंह**राज्ञीः श्रीभर्तुर्यजनविधीनवेदयद्यः ॥ ३५ ॥
यस्तातेसुरपुरपौरतां प्रयाते तद्भूयस्तरविरहावसन्नचेताः ।
निर्विण्णः कथमपि तत्र तत्र **जम्बू**पर्यन्ते समयमयापयच्चिराय ॥ ३६ ॥
यो धीमान्पितृवदवाप्तराज्यकार्यः सौजन्यामृतशिशिरीकृतार्यसार्थः ।
शिश्राय श्रुतनयवीर्यजागरूकव्यापारं नृपरणवीरसिंहदेवम् ॥ ३७ ॥
उन्मीलद्धुसृणकरालकेसरालीसौरभ्यप्रसरतरङ्गपूर्यमाणान् ।
कश्मीरानसकृदियाय लोकदर्शी यो **जम्बू**नगरपुरंदरेण साकम् ॥ ३८ ॥
कैश्मीरासु च कविताल्लतामतल्लीपुष्पर्द्धिप्रकरजिघृक्षयेव वाढम् ।
यः प्राज्ञो व्यहरत भाविकाव्यमालागुम्फाय प्रतिदिननूतनोत्सवश्रीः॥३९॥
वैतस्तप्रचुरतरङ्गबन्धुरायां **श्रीपुर्यां** शिवनिगमावगाहपूर्वम् ।
यो दीक्षामभिनवगुप्तपादकुल्यादाचार्यान्मतिकलिकामिवाग्रहीष्ट ॥ ४० ॥

अथ कालकरालयन्त्रणादहहामुष्य वधूर्दिवं ययौ ।
अनुजोऽप्यगमत्ततः परं सहसास्या हि गवेषणाय किम् ॥ ४१ ॥
इति घोरविपत्तिसागरान्तरमज्जत्प्रतिभस्य यस्य हा ।
शतपत्रदलेऽम्बुविन्दुवन्नहि **जम्बू**नगरे मनोऽसजत् ॥ ४२ ॥
प्रथयन्निव सोऽद्वितीयतां सहसैकाकितया महाशयः ।
क्षितिवल्लभशिष्टिमन्त**रामरनाथस्य** दिदृक्षयाव्रजत् ॥ ४३ ॥
अथ कल्पविधानवर्त्मना विविधांस्तीर्थगणान्सभाजयन् ।
तुहिनाचलकंदरागतं करुणाशालि महो व्यलोकयत् ॥ ४४ ॥

---

१. इदानींतनेन महाराजश्रीप्रतापसिंहेन । २. सज्जनवर्गः । ३. घुसृणं कुङ्कुमम् । ४. करालो रमणीयः । ५. कश्मीराशब्दः स्त्रीलिङ्ग इति सांप्रदायिकाः । ६. शिवनिगमः प्रत्यभिज्ञादर्शनम् । ७. शिष्टिराज्ञा । ८. भट्टेशसंहितानुसारिण्या सरण्या । ९. रसमयं लिङ्गम् ।

[1]भवमौलिसुधांशुपीडनोद्भवपीयूषरसप्रवर्तिता ।
परिराजति यत्र संततं सुखसंतानवहामरावती ॥ ४५ ॥
[2]द्विजराजकलाक्रमेण यो हरभूमोदयतेऽथ लीयते ।
तमनूनकिल्विषाम्बरं सुकृती पूजयति स्म सादरम् ॥ ४६ ॥
रसयन्नमरावतीपयः कलयन्सान्द्रसुधामयं महः ।
दिवसत्रयमत्यवाहयत्सुमनास्तत्र कपोतसाक्षिकम् ॥ ४७ ॥
विनिवृत्य ततो महायशाः शनकैर्जन्मभुवसुंधरामगात् ।
अथ तत्र दिनानि कानिचिद्गमयामास सुहृत्तमैः सह ॥ ४८ ॥
स बुधोऽभिजनावलोकनोपधिनासादितराजशासनः ।
सपरिच्छद एव कौतुकादथ जम्बूनगराद्विनिर्ययौ ॥ ४९ ॥
स वदान्यवरः स लोकते पथि जालंधरपीठदेवताम् ।
अथ तां जनकापचायितां विकसत्सूक्तिसुमर्द्धिं तुष्टुवे ॥ ५० ॥

जय जगदम्ब कदम्बविहारिणि मङ्गलकारिणि कामकले
जय तनुशोभाकम्पितशम्पे लसदनुकम्पे कान्तिनिधे ।
जय जितकामेऽपि जनितकामे [9]शंकरवामे [10]वामगते
जय जालंधरपीठविलासिनि दुःखविनाशिनि भक्तिवशे ॥ ५१ ॥

नानालंकृतिझंकृतिशालिनि मौक्तिकमालिनि केलिपरे
मुनिजनहृदयागारनिवासिनि विद्यास्वामिनि बोधघने ।
सान्द्रानन्दसुधारसभासिनि वीणावादिनि वेदनुते
जय जालंधरपीठविलासिनि दुःखविनाशिनि भक्तिवशे ॥ ५२ ॥

आपत्तूलमहानलकीले मञ्जुललीले भूतिखने
द्युतिजितचम्पकदामकलापे मधुरालापे हंसगते ।

---

१. 'गृहीत्वा शिरसस्तत्र हरश्चन्द्रकलां स्वयम् । संपीड्य देवानवदन्मृत्युभेषजमुत्तमम् ॥ पीडनाया निःसृता च धारा परमिका प्रिये । सैव भूता नदी पुण्या नाम्ना वैद्यनवती ॥' इति पौराणिकी चर्चानुसंधेया । २. 'अमाप्रभृति पूर्णान्तं कलां गृह्णाति चेश्वरः । ततः प्रोक्तश्च तज्ज्ञैर्भगवानमरेश्वरः ॥' इति वचनात् । ३. अमरो मरुतः । ४. 'इत्थं कालस्ततो देवा हरेण परमात्मना । भूत्वा कपोतरूपास्ते तीर्थविघ्नविहारिणः ॥' इत्यागमकथानुसंधेया । ५. जम्बूनगरीम् । ६. उपधिर्व्याजः । ७. श्रीवल्लेश्वरीम् । ८. क्रियाविशेषणमेतत् । ९. शम्भा विद्युत् । १०. शिववामे । ११. रमणीयगमने ।

विभ्रमरञ्जितशंकरहृदये कृतजगदुदये शैलसुते
जय जालंधरपीठविलासिनि दुःखविनाशिनि भक्तिवशे ॥ ९३ ॥
मूले[1] दीपककलिकाकारे विद्यासारे भवसि परा
तस्मादपसृतिकलनावृद्धे मणिपुरमध्ये[2] पश्यन्ती ।
स्वान्ते मध्यमभावाकूता कण्ठे विततता वैखरिका
जय जालंधरपीठविलासिनि दुःखविनाशिनि भक्तिवशे ॥ ९४ ॥
पश्चादाविर्भवमनवद्ये श्रेयःपद्ये यत्तददः
शब्दब्रह्मतया खलु गेयं खमिवामेयं किमपि घनम् ।
पञ्चाशल्लिपिभेदविचित्रं वाङ्मयमात्रं त्वमसि परे
जय जालंधरपीठविलासिनि दुःखविनाशिनि भक्तिवशे ॥ ९५ ॥

---

१. अत्रेदं तत्त्वम्—'येयं विमर्शरूपैव परमार्थचमत्कृतिः । सैव सारं पदार्थानां परा वागभिधीयते ॥ नादाख्या सर्वभूतेषु जीवरूपेण संस्थिता । अनादिनिधना सैव सूक्ष्मा वागनपायिनी ॥ अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् । विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ वैखरी शब्दनिष्पत्तिर्मध्यमा स्मृतिगोचरा । द्योतकार्थस्य पश्यन्ती सूक्ष्मा ब्रह्मैव केवलम् ॥' इत्यादिक्रमेण सर्वत्र सदोदितायाः सूक्ष्मायाः परायाः शब्दब्रह्मणः शक्तेर्बहिरुन्मिषन्त्याः प्रथमो विवर्तः पश्यन्ती नाम । तथा चोक्तम्—'अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा । स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी ॥' इति । अस्यार्थः—अविभागस्थानकरणप्रयत्नप्रकारेण वर्णानां विभागहीना । अत एव संहृतक्रमा तथैवान्तःस्वरूपज्योतिः स्वयंप्रकाशा स्वस्यात्मनो रूपं ज्योतिश्च सर्वत्र हि सर्वविधायिनी शक्तिरेवेति, वान्तः सूक्ष्मबीजादङ्कुरमिव बहिरुन्मिषन्ती किंचिदुच्छ्ना पराया मध्यमायाश्चावस्थां तटस्था पश्यतीति पश्यन्तीत्युच्यते । ततः परं तु 'अन्तः संकल्परूपा या क्रमरूपानुपातिनी । प्राणवृत्तिमतिक्रम्य मध्यमा वाक्प्रवर्तते ॥' एतत्कथयामीति विमर्शरूपा अन्तःसंकल्परूपा प्राणवृत्तिमतिक्रम्य श्रोत्रग्राह्यवर्णाभिव्यक्तिरहिता क्रमरूपानुपातिनी मानसिकवर्णोच्चारणक्रमेण द्वितीयो विवर्तो मध्यमारूपो जायते । मध्यमा किल द्वयोर्वाग्विवर्तयोः पश्यन्तीवैखरीसंज्ञकयोर्मध्ये वर्तमाना मध्यमेत्युच्यते । तदनन्तरं च, 'स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा । वैखरी वाक्प्रयोक्तॄणां प्राणवृत्तिनिबन्धना ॥' इति लक्षणात्स्थानकरणप्रयत्नक्रमव्यज्यमानः श्रोत्रग्राह्यदुन्दुभिवीणादिनादपरिचयो गद्गदाव्यक्तगकारादिविलाससमुच्चयपदवाक्यात्मकतृतीयो विवर्तो वैखरीत्युच्यते । विशिष्टं खमाकाशं मुखरूपं राति गृह्णातीति विखरः प्राणवायुसंचारविशिष्टो वर्णोच्चारस्तेनाभिव्यक्ता वैखरीति ।

२. नाभौ ।

भवभवविभवपराभवहेतो गिरिकुलकेतो भक्तहिते
नानाविधवृजिनोत्करवारिणि करुणासारिणि शान्ततरे ।
सहसोत्सारितसाधकविघ्ने [1]श्रद्धानिघ्ने सुखकलिके
जय जालंधरपीठविलासिनि दुःखविनाशिनि भक्तिवशे ॥ १६ ॥
सिन्दूरद्रवचुम्बितभाले सेवितहाले प्रेमभरे
मातश्चिन्तामणिभवनान्ते निर्भरकान्ते[2] वितततम् [3]।
सोत्कं गायसि किंनरदारैः साकमुदारैः पतिचरितं
जय जालंधरपीठविलासिनि दुःखविनाशिनि भक्तिवशे ॥ १७ ॥
क्लेशं भञ्जय रञ्जय चित्तं वित्तं स्फारीकुरु वरदे
शत्रुं मर्दय वर्धय शक्तिं भक्तिं सान्द्रीकुरु सरले ।
नास्ति कृपानिधिरम्ब त्वत्तो मत्तो मत्ततमो न शिवे
जय जालंधरपीठविलासिनि दुःखविनाशिनि भक्तिवशे ॥ १८ ॥
इत्यमन्दसुधाविन्दुस्यन्दिभिः सूक्तिविभ्रमैः ।
उपश्लोकयति स्मायं तुहिनाचलनन्दिनीम् ॥ १९ ॥
यत्रासेचमकोद्देशे तेन व्यश्रमि धीमता ।
[4]अश्रीतपिवता तत्र [5]जैजागारतमां क्रिया ॥ २० ॥
[6]उपायंसत कर्माणि येनाम्नायोऽध्यगाय्यपि ।
विदानींयि निजावासं स कालीदत्तभूसुरः ॥ २१ ॥
मौञ्जीवन्धगुरोस्तस्मात्कूर्माचलनिवासिनः ।
समयोऽयाप्पयाप्पेर्न शिक्षाः काश्चन गृहता ॥ २२ ॥
अथाभ्यर्च्य स गुर्वादीनन्तर्वाणिशतक्रतुः ।
प्रीतः प्रतस्थे ग्रामाय हमजापुरसंज्ञिने ॥ २३ ॥
पूर्णचन्द्रमिवामन्दं प्रसन्नोस्रावलीवृतम् ।
स विद्याधिस्तमासाद्य मुदं कामप्यविन्दत ॥ २४ ॥

---

१. श्रद्धाधीने । २. तसम्यन्तं संबुद्धन्तं वा । ३. विततं ततं वीणादिवाद्यं यस्मिन्कर्मणि । ४. अश्रीत पिवतेत्येवं सततं यत्राभिधीयते साश्रीतपिवता । ५. 'तिङश्च' इत्यतिशायने तमप् । ६. स्वीकृतानि । उपपूर्वको यमिः स्वीकरणे वर्तते, ततः कर्मणि लुङ् । ७. नयतिर्द्विकर्मकस्तत्र प्रधानकर्मणि लुङ् । ८. अनिन्दितेन । ९. इरम् गावो मदुक्तम् ।

धिन्वंस्त्रेतामनूचानः स हिन्वन्सुकृतं मुहुः ।
तत्रास्त कतिचिन्मासान्कृतदारपरिग्रहः ॥ ६५ ॥
अथ श्रीरामसिंहस्य माहेश्वरशिखामणेः ।
फुल्ला कीर्तिरमुष्यागादसकृत्कर्णपूरताम् ॥ ६६ ॥
ततो दैवज्ञवेतण्डः स भूजानिदिदृक्षया ।
कमलाध्येयसौभाग्यां पुरीं जयपुरीमयात् ॥ ६७ ॥
यो भाति न्यायनीवीव प्रकाशितनवक्षणा ।
परं गुणिनि वर्वर्ति यत्र शक्तिर्विलक्षणा ॥ ६८ ॥
प्रसरत्कीर्तिकर्पूरकरण्डीभूतभूतलम् ।
उपतस्थे स वागीशो रामसिंहविडौजसम् ॥ ६९ ॥
विकसत्स्फारसत्कारपरिष्कारपुरःसरम् ।
स राजावीवसद्रूपमभिरूपर्ममाशु तम् ॥ ७० ॥
अमलगुणसमृद्ध्या रञ्जयन्पौरवर्गा-
नतिविस्मरकीर्त्या भूषयन्भूमिभागान् ।
स सह निखिलविद्यामार्मिकैर्मित्रलोकै-
ररमत जयपुर्यां रामसिंहाश्रयेण ॥ ७१ ॥
अनुगृहमनुरथ्यं तथ्ययत्प्रेमबन्ध-
व्यतिकरपरिनिष्ठान्मानवान्वीक्ष्य वीक्ष्य ।
इह जयपुरमध्येऽमुष्य कस्को महीया-
न्सुहृदिति परिमातुं मानसं वम्भ्रमीति ॥ ७२ ॥

---

१. दक्षिणाग्निर्गार्हपत्याहवनीयरूपमग्नित्रयं त्रेतेति कथ्यते । २. साङ्गे वेदेऽधीती । ३. अत्र वृद्ध्यर्थको हिनोतिः । ४. वेतण्डो गजः, उपमितसमासः । ५. प्रकाशिताः प्रकटिता नवा नूतनाः क्षणा उत्सवा यस्यां तथाभूता या पुरी न्यायपद्धतिरिव । इयं च कीदृशी । प्रदर्शिता नवसंख्याकाः परमाणुपाकक्षणा यस्यां सा । यद्यपि वैशेषिकैरेवायं पक्षोऽङ्गीक्रियते न तावन्नैयायिकैस्तथापीह न्यायशब्देन सामान्यन्यायग्रहस्तेनाक्षपादकणभक्षपक्षयोरपि संग्रहः । गुणे शक्तिर्गुणिनि लक्षणेति नैयायिककुलालापः, परं यत्र गुणिनि विलक्षणा शक्तिर्जागर्तीति व्यतिरेकोद्भावनम् । गुणा औदार्यादयः शुक्लादयश्चेति तत्त्वम् । ६. 'प्रशंसायां रूपप्' इति रूपप् । ७. पण्डितम् । ८. अमा सर्मीपे ।

अयमहह कविः किं विष्णुगुप्तोऽथ वा किं
किमु सकलकलाविन्मण्डनं मूलदेवः ।
इति विविधविकल्पा यन्नयप्रेक्षकाणां
प्रतिकलमतिवेलं मानसे प्रादुरासन् ॥ ७३ ॥

स जयनगर-रीवाँलब्धलक्ष्मीसनाथः
कवितृगुरुदयालोः संभवः श्यामनाथः ।
सदुपकरणसज्जं सज्जनानन्ददात्रे
सदनवरममुष्मै सादरं यच्छति स्म ॥ ७४ ॥

अथ स सुकृतसक्तो मातृदारादियुक्तो
विकसितहरिभक्त्या रामसिंहानुमत्या ।
अनवरतसमुद्यद्भावपीयूषधारा-
स्नपितमति चचाल श्रीवदर्याश्रमाय ॥ ७५ ॥

अधिहृदयसरोजं ब्रह्मचिन्तापराणा-
मुपनदि विजयन्ते यज्वनां यत्र वर्गाः ।
विविधजनिचितानां पातकानां विपक्षं
तदतिरुचि स गङ्गाद्वारमैक्षिष्ट धन्यः ॥ ७६ ॥

घटयति मुदमन्तर्यत्र वल्लीमतल्ली-
जटिलतरुनिवेशः कुञ्जकाम्रप्रदेशः ।
तमनुदिवसदीव्यद्भक्तिसंपत्तिलीला-
वलयितहृदयः स श्रीहृषीकेशमाप ॥ ७७ ॥

श्वसनचलनलीलालोलकूलप्रलुठ-
द्रुमकुसुमपरागासारसौरभ्यगर्भाः ।

---

१. विष्णुगुप्तश्चाणक्यः । २. मूलदेवनामा कश्चिदतिप्राचीनः कलाशास्त्रप्रवर्तको बभूव । तस्यैव कणीसुतः, कलाङ्कुरः, मूलभद्रः, एतान्यपि नामान्तराणि वर्तन्ते । वासवदत्तायां स्वयंवरवर्णनावसरे 'तत्र च केचित्कलाङ्कुरा इव विजितनगरमण्डनाः' इत्यास्ते । ३. हरिद्वारम् ।

दधति कमपि मोदं यत्र गङ्गातरङ्गाः
स सुखखनिरनेनालोकि **देवप्रयागः** ॥ ७८ ॥

विकचकुसुमभाराभुग्नकुञ्जान्तरालो-
ल्लसदमरवधूटीगीतरुद्रावदानः ।
अचलपतदमन्दध्वानवारिप्रवाह-
च्छुरितस्तुतिरनेनावन्दि **रुद्रप्रयागः** ॥ ७९ ॥

जयति जगदमन्दानन्दमन्दारशाखी
तुहिनकरकिरीटो यत्र **केदारनाथः** ।
तमतनुवृषलभ्यं देशमासाद्य विद्वा-
न्कृतयजनमथैनं वाग्विलासैरनौषीत् ॥ ८० ॥

आसाकीनं करालं जवमिह भुवने कः सहेदित्यखर्वा-
हंकारोल्लासवल्गल्लहरिशतलुठल्लोलयादोमतल्ली ।
मल्लीमालेव यस्योद्भटविकटजटाकोटरे निष्पतन्ती
दीव्यत्यभ्रस्रवन्ती स मम हृदि सदा भातु चन्द्रार्धमौलिः ॥ ८१ ॥

व्योम्नीवाम्भोदलेखा ह्रद इव लहरीधोरणी पूषणीव
श्यामाकान्तांशुलक्ष्मीरुदयमथ लयं याति यत्र त्रिलोकी ।
ज्वालाजिह्वालफालज्वलनकवलितोद्दर्पकंदर्पवीरो
हीरो वृन्दारकाणां विशदयतुतरां शेमुषीं सोऽष्टमूर्तिः ॥ ८२ ॥

उद्यत्सान्द्राम्बुवाहव्यतिकरसुषमासंनिभे कण्ठपीठे
शंपाराजीव यस्यावनिधरदुहितुर्दोर्लता जाज्वलीति ।
स त्रैलोक्यैकनाथोऽदितितनयधुनीमुग्धडिण्डीरपिण्ड-
प्रख्यः श्रीकङ्कटीको मम निविडतमोग्रन्थिभेदाय भूयात् ॥ ८३ ॥

---

१. अवदानं कर्मवृत्तम् । २. वृषः सुकृतम् । ३. 'तस्मिन्नणि च–' इत्यस्माकादेशे रूपम् । ४. 'आधृषाद्वा' इति वैभाषिको णिच्, अत एव 'स एवायं नागः सहति कल-भेभ्यः परिभवम्' इत्यादि संगच्छते । ५. श्यामाकान्तश्चन्द्रः । ६. राजी लेखा । ७. यङ्लुकि रूपम् । ८. कङ्कटीकः शिवः ।

संतापस्विन्नचूडामृतकिरणगलत्स्फारपीयूषधारा-
फालाग्नौ यस्य दुग्धाहुतिरिव सततं निष्पतन्ती चकास्ति ।
स ब्रह्माण्डप्रकाशावनलयघटनानाटिकासूत्रधारो
गौरीप्राणप्रियो नः प्रथयतु सुतरां तानि तानीहितानि ॥ ८४ ॥
श्रीपीयूषादिवस्तुप्रकरविभजनोद्भूतवादैकविज्ञा
देवंमन्या महेच्छा अहह कति दिवो भारभूता न सन्ति ।
देवस्त्वेकस्त्रिलोकाभ्रविषकवलीकारकेलीविदग्धो
वर्वर्त्यार्तानुकम्पाकृततनुरचनासेचनो रेरिहाणः ॥ ८५ ॥
पुष्पानेहेव बाढं विबुधविटपिपूत्कर्षगुच्छप्रकर्षं
तन्वन्धुन्नोऽपि सद्यो मयपुरदहनं यो व्यधाद्विश्वभूत्यै ।
सोऽव्यादेकोऽप्यनन्तो यतिरपि सततं हीनभोगी प्रकामं
कान्ताश्लिष्टोऽप्यकान्तः शशधरमुकुटालंकृतिर्देवदेवः ॥ ८६ ॥
देवानां सार्वभौमो विविधभवभवाज्ञानवाटीकुठारः
श्रेयःश्रीरङ्गशालाखिलनिगमकलाकल्पनोल्लाससीमा ।
सर्वाहोभङ्गबीजं मुनिजनहृदयागाररत्नप्रदीपः
कश्चिद्भूमास्तु भूत्यै स्फुटकुमुदवनीभार्गवीगेयकान्तिः ॥ ८७ ॥
क्रोडक्रीडत्पृदाकूत्कटविकटजटाटोपटंकारकेलि-
च्युत्यन्नक्षत्रचक्रक्रमिकचटचटाकारिवृष्टिप्रकृष्टम् ।
उच्चैर्दोर्दण्डपण्डभ्रमणवलयिताशेभचीत्कारचण्डं
पादप्रक्षेपकम्प्रक्षिति मदनकृपस्ताण्डवं नः पुनातु ॥ ८८ ॥
इतीशमभिवन्द्य स स्फुरदसीमभक्तिच्छटा-
सुधामसृणमानसो गिरिविभूतिमालोकयन् ।

---

१. ललाटपावके । २. ईहितानीति च्छेदः । ३. आलेचनमतिमनोहरम् । ४. रेरिहाणो महादेवः । ५. पुष्पानेहा वसन्तः । ६. सुष्ठु शोभना सा जटा यस्येति त्रिलोचनविशेषणम् । ७. न विद्यतेऽन्तो यस्येति परिहारः । ८. अहीनः, अहीनाभिनः, इति यथायोग्यमनुसंधेयम् । ९. अर्धनारीश्वरत्वादित्यर्थः । १०. अकानां ह्रस्वानां पादानां या अन्तो नाशो यस्मादिति परिहारः । ११. चण्डं तीक्ष्णम् ।

पुरंदरपुराङ्गनासुभगदोलिकान्दोलन-
स्खलत्कुसुमपादपं बदरिकाश्रमं प्राप्तवान् ॥ ८९ ॥
दवीयसि मनोहरा व्यतिकरेण दुःखप्रदा
मनागपि निषेविता हृदयकम्पलीलावहाः ।
अनन्तपदरोधिकास्तुहिनवृष्टयः केवलं
कदाचन करालतां दधति यत्र कायस्थवत् ॥ ९० ॥
स्फायत्सान्द्रतुषारवर्षविकसत्सर्वाङ्गकम्पोदये
यस्मिल्लोकँमहेशितुर्भगवतो नारायणस्याज्ञया ।
निष्टप्तोदककैतवेन दहनो न प्राज्वलिष्यद्यदा
सा सा सज्जनधर्मकर्मकलना नैवाभविष्यत्तदा ॥ ९१ ॥
न्यक्कुर्वन्स्फुटकोटिभङ्गिरचनैः प्राभाकरं मण्डलं[1]
शक्तिं काञ्चनभास्वरां प्रकटयज्जात्याकृतिव्यक्तिषु ।
अर्थापत्तिनिवारणैकनिपुणो द्रव्यप्रपञ्चोर्जित-
स्तस्मिंस्तर्कवदैक्षि येन कृतिना नारायणस्यालयः ॥ ९२ ॥
तत्रान्तस्तिमिरावलीं कवलयञ्ज्ञानाङ्कुरं वर्धय-
न्नानन्दं रचयंस्तपस्यतितरां नारायणो योऽनिशम् ।

---

१. येन कृतिना तस्मिन्बदरिकाश्रमे तर्कवन्न्यायशास्त्रवन्नारायणस्यालयः पर्वत-रूपो मण्डपरूपो वा ऐक्षि व्यलोकि । किंभूतः । स्फुटाः प्रकटा याः कोट्यो-ऽप्रभागास्तासां भङ्गिरचनैर्विन्यासकरणैः; (पक्षे) स्फुटा अव्यभिचरिता याः कोटयः पूर्वो-त्तरपक्षसंबन्धिन्य उक्तिप्रत्युक्तयस्तासां भङ्गिरचनैः परिष्कारविशेषकल्पनैः । प्राभाकरं म-ण्डलं रविबिम्बम्; (पक्षे) प्रभाकरापरनामधेयस्य गुरोर्मण्डलं तदनुयायिमीमांसकवर्गं न्य-क्कुर्वंस्तिरस्कुर्वन् । पुनः । जात्या रमणीया श्रेष्ठा वा, या आकृतिस्तस्या व्यक्तिषु; (पक्षे) जातिः समानप्रसवात्मिका, आकृतिर्जातिलिङ्गाख्या, व्यक्तिर्गुणविशेषाश्रयो मूर्तिः तासु । काञ्चनेन भास्वरां शक्तिम्; (पक्षे) कांचन अनिर्वचनीयां भास्वरां तत्तत्पदार्थविशेषसंक्रमण-क्षमसामर्थ्यविकस्वरां शक्तिमर्थस्मृत्यनुकूलं पदपदार्थसंबन्धं प्रकटयन् । अर्थानामापत्ति-निराकरणे एको निपुणः; (पक्षे) अर्थापत्तिः प्रमाणान्तरम्, सा नैयायिकैर्नाद्रियते, अत ए-वोक्तम्—'अर्थापत्तिस्तु नैवेह प्रमाणान्तरमिष्यते । व्यतिरेकव्याप्तिबुद्ध्या चरितार्था हि सा यतः ॥' इति । द्रव्याणां वित्तानाम्; (पक्षे) नवसंख्याकानां प्रपञ्चैर्विस्तारैर्विस्तरैश्च ऊर्जितः ।

तं योगीश्वरवृन्दवन्दितपदद्वन्द्वं स मात्रादिभिः
साकं पूजयति स्म दानविकसद्भूनिर्जरालोकवाक् ॥ ९३ ॥
तत्रोवास दिनानि पञ्च सुकृती सर्वार्थसंपादकं
श्रीनारायणपादपद्मयुगलं नक्तंदिवं चिन्तयन् ।
प्रत्यावृत्य ततोऽथ निर्मलझरान्वेल्लल्लताग्रान्नगा-
न्पश्यन्नेष शनैः शनैर्जयपुरीं प्राप स्वकीयैः सह ॥ ९४ ॥
तत्रानन्दमरन्दतुन्दिलमनाः स श्यामनाथादिभिः
शास्त्रालोडनजागरूकधिषणोन्मेषैः सुहृद्भिः समम् ।
प्रीतिं पल्लवयञ्श्रुतानि कलयन्विद्यार्थिनः पाठयं-
स्तत्तद्ग्रन्थशताशयं विशदयन्कालं किलायापयत् ॥ ९५ ॥
येनोद्यत्प्रतिभेन कुञ्जरनभोभोगीन्दु(१८०८)संख्ये शके
सार्धं श्रीयुतकाशिनाथविदुषा मुम्बापुरीवर्तिनि ।
यन्त्रे निर्णयसागरेऽद्भुततरे श्रीजावजीश्रेष्ठिनः
प्रावर्तिं प्रतिमासजन्मघटना सा काव्यमालामला ॥ ९६ ॥
वाढोत्कर्षतया यया स्वविषये व्युत्पत्तिचर्याचणा
भूयांसः कृतिनोऽत्र मौक्तिकलनावैदग्ध्यमध्यापिताः ।
तस्याः काव्यकलाकलापलतिकाप्रागल्भ्यलक्ष्मीभुवो
माहात्म्यं गदितुं मनागपि मया मूढेन किं पार्यते ॥ ९७ ॥
श्लाघ्यश्चित्रपवित्रकीर्तिसदनं दुर्गाप्रसादो बुधः
काशीनाथधरामरोऽमलयशाः श्रीजावजीश्रेष्ठ्यपि ।
सूर्यस्येव कलानिधेरिव बृहद्भानोरिवाच्छिद्यते
यैतत्सत्त्वैर्युगपद्धि लोकतिनिरं श्रीकाव्यमालात्मकैः ॥ ९८ ॥
विद्याशास्त्रकलाकलापकलनाकूपारमन्याद्रिणा
पी. पीटर्सनपण्डितेन सुहृदा साकं स वागीश्वरः ।

---

१. क्रियाविशेषणम् । २. झरा वारिप्रवाहाः । ३. 'टपापोः सेनानन्दस्तोर्पुटम्' इति ह्रस्वत्वम् । ४. मौक्तिकं मुक्तत्वम् । प्यञ् । ५. बृहद्भानुः पावकः । ६. यद्धवसायैः ।

एकीभूय सुभाषितावलिमथो तान्कामसूत्रादिका-
न्ग्रन्थान्संस्कुरुते स्म सुज्ञहृदयाम्भोजप्रसत्त्यै स्वयम् ॥ ९९ ॥
तत्तद्देवविशेषदर्शनकैनत्सान्द्रानुरागेण यो
विद्वानङ्गकलिङ्गवङ्गमगधान्देशाञ्जुँलोकेतराम् ।
पी. पीटर्सनसूरिणा सह लसत्स्फारप्रमोदोद्गमो
वाचोयुक्तिपटुश्च गुर्जरमहाराष्ट्रान्ध्रकर्णाटकान् ॥ १०० ॥
अस्तानि कूपो हमजापुरेऽमुना रसान्तरोद्यज्जलपूरपूरितः ।
अकारि चाभ्रंकपकेतुवन्धुरं गिरीन्द्रकन्यादयितस्य मन्दिरम् ॥ १०१ ॥
एकदा निजकलत्रनोदितं लोहतन्तुसरणीसमागतम् ।
स्वान्तपद्महिमवर्षणायितं वृत्तजातमयमित्यवाचयत् ॥ १०२ ॥
'जृम्भतेऽत्र सुतरां खलु मौरी पीड्यते तव सुतादि तया हा ।
एहि कारुणिक सत्वरमौराद्वेपतेऽथ वलते मम चेतः ॥ १०३ ॥'
अथ पण्डितोऽपि सहसा विकलोऽनभिभाष्य कांश्चिदपि मित्रजनान् ।
जवनेन धूमशकटेन ययौ हमजापुराय लघु सोऽनुमनः ॥ १०४ ॥
निष्काश्यन्ते पितृवनकृते केऽपि, केचिन्म्रियन्ते,
लोलुठ्यन्ते कतिचन भुवि स्रस्तसर्वाङ्गबन्धाः ।
केचिन्मूर्छन्त्यहह, कतिचित्संचिकित्स्यन्त उच्चै-
रेवं मारीविकृतिरभवद्यत्र तं ग्राममापत् ॥ १०५ ॥
तत्रावासे कन्ययोः कालधर्मं श्रुत्वा रुग्णं दारकं वीक्ष्य धीरः ।
एनं सम्यक्संचिकित्सांबभूव प्राक्पुण्येनाभावि कल्येन तेन ॥ १०६ ॥
अथ स सुमना वेदक्षोणीगजेन्दु(१८१४)मिते शके-
ऽसितदलभुवि ज्येष्ठाष्टम्यां भृगौ हमजापुरे ।

---

१. एकनी दीप्तौ । २. वाचो युक्तिः, 'वाग्दिक्पश्यद्भ्यः—' इति षष्ठ्या अलुक् । तत्र पटुः, वाग्मीत्यर्थः । ३. लोकप्रसिद्धतारमार्गेण प्राप्तम् । ४. तन्नाम्ना प्रसिद्धो रोगविशेषः । ५. समीपम् । ६. रेलनाम्ना प्रसिद्धेन धूमयानेन । ७. श्मशानार्थम् । ८. मृत्युम् । ९. आ-निरामयः । ११. अर्थात् १८९२एतत्संख्याकस्य खिस्ताब्दस्य मेसंज्ञके त्मजम् । १०. कल्यो- । १२. कृष्णपक्षसंबन्धिन्याम् ।
मासेऽष्टादशतारकायाम् न्वेह प्रमाणा-
य: (पद्

पठनकृतये गीर्वाणानां ध्रुवं मतिचातुरी-
विजितधिषणः शक्राहूतो ययावमरावतीम् ॥ १०७ ॥
गतवति त्रिदिवं निजवल्लभे तदवसानविधिं विरचय्य सा ।
तनुभुवा सह तस्य कुटुम्बिनी जयपुरीमविलम्बितमायत ॥ १०८ ॥
अलं राजहंसाभिमानच्छिदायै यदीयौ सुकीर्तिप्रतापौ विभातः ।
स राड्रामसिंहात्मजो माधवेन्द्रस्तयोर्जीविकां प्रीतिपूर्वं चकार ॥ १०९ ॥
स्फारसौजन्यपीयूषसिक्तात्मनः काशिनाथाभिधानस्य सूरेरथ ।
जावजीभू-तुकारामसच्छेष्ठिनो योगतः पूर्ववत्काव्यमालाततिं ॥ ११० ॥
मुम्बापुरपाठवेश्मविज्ञं पी. पीटर्सनशास्त्रसिन्धुराजम् ।
तच्छोधनकर्मणावशिष्टा क्लिष्टा राजतरङ्गिणी जगाम ॥ १११ ॥
तदुपरि किल टिप्पणीचिकीर्षा सकलरहस्यविदो गुरोर्ममासीत् ।
इति तदभिमतस्य पूर्तिसिद्ध्यै विवृतिकृते मयका प्रयत्यतेऽद्य ॥ ११२ ॥
युक्तायुक्तविवेकमार्मिकतया जीवायमानोऽनिशं
यस्यामात्यधुरंधरो विजयते श्रीकान्तिचन्द्रो द्विजः ।
तस्य श्रीयुतमाधवेन्द्रनृपतेर्दोःकल्पवृक्षाश्रितो
हृष्टस्तच्छिशुरेधते जयपुरे केदारसंज्ञोऽधुना ॥ ११३ ॥
द्योतन्तां क्षितिमण्डले पार्वणचन्द्रमहांसि ।
तस्यामलगुणधोरणीसंभूतानि यशांसि ॥ ११४ ॥
तातश्रीसरयूप्रसादचरणस्वर्वृक्षसेवापरो
मातृश्रीहरदेव्यपारकरुणापीयूषपूर्णान्तरः ।
हृत्पद्मभ्रमरायमाणगिरिशो दुर्गाप्रसादः सुधी-
रास्ते तद्रचनांसकौ सुकृतिनां कण्ठेषु हारायताम् ॥ ११५ ॥

इत्ययोध्यापरप्रान्तवर्तिपण्डितपुरीवास्तव्यद्विवेदोपाह्याचार्यसरयूप्रसादसुत-
दुर्गाप्रसादविरचितं प्रसादशतकम् ।

---

१. अग गतौ । २. राजा चन्द्रः, हंसः सूर्यः, वा राजहंसा राजश्रेष्ठाः । ३. सिद्धान्तित्वात् ।
४. जीवो बृहस्पतिः । ५. अतएवात्रकौ, 'अव्ययसर्वनाम्नामकच्प्राक्टेः' इत्यकच् ।